दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः
himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः
■ पृष्ठ-3 ■ वर्ष-3 ■ अङ्क-289
1 11.08.2024 रविवासरः वि.सं. २०८० श्रावणशुक्ल सप्तमी श्रावण 27 प्रविष्ठांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## कोलकातानगरे चिकित्सकाया हत्या विषये महारोषः



हिमसंस्कृतवार्ताः। कोलकातानगरे एकस्मिन् सर्वकारीय चिकित्सालये महिला चिकित्सायाः हत्यायाः प्रकरणं प्रकाशे आगतं, येन सम्पूर्णे क्षेत्रे महारोषस्य स्थितिः वर्तते। प्रकरणे अस्मिन् दोषीणां विषये पश्चिमबङ्गस्य मुख्यमन्त्री ममता बनर्जी क्रुद्धा अस्ति। ममता बनर्जी इत्यनया उक्तं यत् यदि आवश्यकं चेत् दोषिभ्यः पाशे बद्धवा मृत्युदण्डः भविष्यन्ति। उल्लेखनीयं यत् कोलकातानगरस्य एकस्मिन् सर्वकारीये चिकित्सालये कार्यरतायाः पीजीटी-चिकित्सकायाः मृतदेहः शुक्रवासरे अर्धनग्नावस्थायां मिलितः अभवत्। एषा महिला वैद्या चिकित्सालयस्य वक्षःस्थलरोगचिकित्साविभागस्य द्वितीयवर्षस्य छात्रा आसीत् । ममता बनर्जी इत्यनया एषा घटना अत्यन्तं दुर्भाग्यपूर्णा इति वर्णिता अस्ति । सा पुष्टिम् अकरोत् यत् हत्यायाः आरोपिणः गृहीताः सन्ति। मुख्यमन्त्री उक्तवती यत् मया निर्देशः दत्तः यत् प्रकरणं द्रुतमार्गन्यायालये नेतव्यम् इति। आवश्यके सति अपराधिभ्यः मृत्युदण्डः भविष्यन्ति। घटनायाः अनन्तरं चिकित्सालयस्य बहिः चिकित्साशास्त्रस्य छात्राः, भाजपा, काङ्ग्रेस, वामपक्षः च विरोधं कृतवन्तः। पश्चिमबङ्गस्य भाजपानेता सुवेन्दु अधिकारी इत्यनेन सीबीआइ-अन्वेषणस्य आग्रहः कृतः।

## सुभाषितम्

**चन्दनं शीतलं लोके,**
**चन्दनादपि चन्द्रमाः।**
**चन्द्रचन्दनयोर्मध्ये**
**शीतला साधुसंगतिः।।**

**भावार्थः-** इस लोक में चन्दन को सर्वाधिक शीतल माना जाता है, परन्तु एक अच्छा मित्र चन्द्रमा और चन्दन से अधिक शीतल होता है। इन दोनों से भी अधिक शीतल सज्जनों की संगति होती है।

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## एकादृष्टिः

### बांग्लादेशे अधुना सर्वोच्चन्यायालयस्य न्यायाधीशाः विरोधप्रदर्शनस्य केन्द्राणि, न्यायाधीशस्य औबेदुलहसनस्य त्यागपत्रम्

हिमसंस्कृतवार्ताः। बांग्लादेशे अधुनाऽपि विरोधप्रदर्शनानि न स्थगितानि। ह्यः बाङ्गलादेशस्य छात्रैः विरोधप्रदर्शनपुरस्सरं सर्वोच्चन्यायालयस्य परिभ्रमणं कृतम्। तैः सर्वोच्चन्यायालयस्य न्यायाधीशानां त्यागपत्राय प्रदर्शनं कृतम्। सर्वोच्च-न्यायालस्य न्याययाधीशः ओबैदुल हसनः पदपरित्याग-पत्रं निर्णीतवान्। असौ औपचारिक कार्याणां प्रपूर्त्यनन्तरं राष्ट्रपतिने पदपरित्याग पत्रं सर्मपयिष्यति। इति सः वार्ताहरान् मध्याह्ने सूचितवान् ।

### प्रधानमन्त्री-नागर-आवास योजनायाः द्वितीय-चरणं अनुमोदितम्-सूचनाप्रसारणमन्त्री

हिमसंस्कृतवार्ताः। प्रधानमन्त्री-नागर-आवास योजनायाः द्वितीय-चरणं अनुमोदितम्। मन्त्रिमण्डलेन प्रवर्तमान-आगामि-वर्षाय च कृते प्रधानमन्त्रि-ग्रामीण-आवास-योजना-प्रभाविचरणाय अपि अनुमतिः प्रदत्ता। सन्दर्भेऽस्मिन् सूचना-प्रसारण-मन्त्रिणा अश्विनी वैष्णव-वर्येण परह्यः प्रतिपादिता यत् योजनान्तर्गतं द्वि-कोट्यधिक-ग्रामीण क्षेत्रेषु, कोट्यधिक-नागर-क्षेत्रेषु आवासाः निर्मास्यन्ते।

### नवदिल्ल्यां औषध-पानस्य द्विवार्षिकस्य राष्ट्रव्यापिनः अभियानस्य द्वितीय-चरणस्य आभासीयः आरम्भः

हिमसंस्कृतवार्ताः। स्वास्थ्य-राज्य-मन्त्री प्रतापराव जाधवः 'लिम्फैटिक फाइलेरिया-गज-पादस्य उन्मूलनाय गतदिने नवदिल्ल्यां औषध-पानस्य द्विवार्षिकस्य राष्ट्रव्यापिनः अभियानस्य द्वितीय-चरणस्य आभासीयं आरम्भं कृतवान्। श्रीजाधवः प्रोक्तवान् यत् 'लिम्फैटिक फाइलेरिया गजपादस्य अवरोधनाय मसकानां कर्तनात् निवारणम् फाइलेरिया-रोधिनां औषधानां पानमस्ति महत्वपूर्णाः उपायाः। विंशति राज्यानाम् केन्द्र शासित प्रदेशानां जनाः सन्ति अनेन प्रभाविताः।

### अन्तरिक्षदिवसः-अन्तरिक्ष प्रौद्योगिक्याः विषये एकदिवसीय-राष्ट्रीयकार्यशालायाः आयोजनम्

हिमसंस्कृतवार्ताः। आपद् प्रबन्धनस्य राष्ट्रियसंस्थाने आपदप्रबन्धने अन्तरिक्ष प्रौद्योगिक्याः विषये एकदिवसीयराष्ट्रीयकार्यशालायाः आयोजनं कृत्वा प्रथमः राष्ट्रियः अन्तरिक्षदिवसः चतुश्चत्वारिंशत् उत्तर द्विसहस्रे आयोजितः।

## वित्तमंत्री बैंकप्रणाल्यां 'कोर-बैंकिंग' इत्यस्य विशेषरूपेण ध्यानं प्रदानाय बलं प्रदत्तवती



हिमसंस्कृतवार्ताः। वित्तमंत्री निर्मला सीतारामनः बैंकप्रणाल्यां 'कोर-बैंकिंग' इत्यस्य विशेषरूपेण ध्यानं प्रदानाय बलं प्रदत्तवती। नवदिल्लयां रिजर्व बैंक-इत्यस्य केन्द्रीय-निदेशक-मण्डलस्य उपवेशने वित्तमंत्री बैंकप्रणाल्यां संचित-ऋण-राशिभिः सम्बद्धानि प्रमुखानि कार्याणि प्रथमिकतां प्रदातुमु उक्तवती । वित्तमंत्री उक्तवती यत् सर्वकारः बैंकप्रणाल्याः नियमेषु संशोधनमानयति। यस्य दीर्घकालेन प्रतीक्षा आसीत्।

## राष्ट्रपतिः द्रौपदी मुर्मुः तिमोर-लेस्टे इत्यस्य सर्वोच्च-नागरिक-सम्मानेन सम्मानिता



हिमसंस्कृतवार्ताः। राष्ट्रपतिः द्रौपदी मुर्मुः तिमोर-लेस्टे इत्यस्य सर्वोच्च-नागरिक-सम्मानेन ग्रेडकॉलर ऑफ ऑर्डर इत्यनेन सम्मानिता । राष्ट्रपतिना जोसे-रामोस तो र्ता-वर्येण डिलि स्थाने राष्ट्रपति प्रासादे तस्यै सम्मानमिदं अलंकृतम्। अवसरेऽस्मिन् राष्ट्रपतिना श्रीमत्या द्रौपदी-मुर्मु वर्यया तत्रत्य राष्ट्रपतिना हो र्ता प्रधानमन्त्रिणा गुसमाओ वर्येण समं द्विपाक्षिक-सहयोग-सम्बन्धे सम्भाषणमपि विहितम्।

## प्रशासनं भारत-मालदीव-अन्य-क्षेत्रीय-जनानां लाभाय मालदीव-देशेन सार्धं घनिष्ठ-सम्बन्धान् प्रति वचनबद्धमस्ति-

हिमसंस्कृतवार्ताः। विदेश मन्त्रिणा सुब्रह्मणयम जयशंकरेण प्रतिपादितं यत् प्रशासनं भारत-मालदीव-अन्य- क्षेत्रीय-जनानां लाभाय मालदीव-देशेन सार्धं घनिष्ठ-सम्बन्धान् प्रति वचनबद्धं वर्तते। डॉ. जयशंकरः त्रि-दिवसीय यात्रायै मालदीव-देशे वर्तते। तेन राष्ट्रपतिनम् डॉ. मोहम्मद-मुइज्जु वर्येण समं सम्भाषणमपि विहितम्। तयोः मध्ये रक्षा-सुरक्षा सम्बद्ध-सहयोग-सामुद्रिक सुरक्षायै संयुक्त-पदक्षेपानां विषये शान्ति-स्थिरतां च सन्धारयितुं तेषां हितानां विषये चर्चा जाता। विदेश-मन्त्रिणा आर्थिक-विकास-व्यापार-मन्त्री-वित्तमन्त्री-मालदीव-मौद्रिक प्राधिकरणस्य प्रमुखेण समंपि चर्चा कृता।

## प्रधानमन्त्री नरेन्द्रमोदी वायनाडनगरस्य सौख्यशिबिरेषु भ्रमणं कृतवान्



**हिमसंस्कृतवार्ताः प्रवीण कुमारः।** प्रधानमन्त्री नरेन्द्रमोदी ह्यः वायनाडनगरस्य राहतशिबिरं गत्वा भूस्खलनेन प्रभावितैः जनानां सह संवादं कृतवान्। सः मातापितरौ त्यक्तौ छात्रौ सान्त्वितवान्। प्रधानमन्त्री मेप्पाडीनगरस्य एकं चिकित्सालयं गत्वा चिकित्सां कुर्वन्तः आहतैः सह संवादं कृतवान्। ततः पूर्वं प्रधानमन्त्री भूस्खलनेन दुर्घटितानां चुरालमाला-मुण्डक्कई-नगरयोः भ्रमणं कृतवान्। सः चुरालमाला इत्यत्र सेनानिर्मितस्य बेलीसेतोः अपि दर्शनं कृतवान्। प्रधानमंत्री सेना, विशेष परिचालन समूह एवं राष्ट्रीय आपदा प्रतिक्रिया बलस्य कर्मचारिभिः सह अपि वार्ता कृतवान्। प्रधानमन्त्रिणा अत्र पञ्चरिवट्टम्, मुण्डक्कई, अट्टमाला इत्यादीनां भूस्खलनप्रभावितक्षेत्राणां विमानसर्वक्षणमपि कृतम्। प्रधानमन्त्रिणः सह केरलस्य राज्यपालः आरिफ मोहम्मदखानः, मुख्यमन्त्री पिनारायी विजयः, पर्यटन- पेट्रोलियम-प्राकृतिकगैसराज्यमन्त्री सुरेशगोपी अपि आसीत्।

दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

11.08.2024 रविवासरः वि.सं. २०८० श्रावणशुक्ल सप्तमी श्रावण 27 प्रविष्टांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com

# ३५ विस्तृतपरियोजनाप्रतिवेदनेभ्यः शीघ्रमेव नाबार्ड इत्यत्र अनुमोदनं प्राप्स्यते



## लोकनिर्माणमन्त्री अधिकारिभ्यः औपचारिकतां पूर्णां कर्तुं निर्दिष्टवान्

हिमसंस्कृतवार्ताः - शिमला। लोकनिर्माणमन्त्री विक्रमादित्यसिंहः अवदत् यत् विभागस्य विभिन्नपरियोजनाभिः सह सम्बद्धानि ३५ विस्तृतपरियोजनाप्रतिवेदनानि सम्प्रति नाबार्ड इत्यत्र लम्बितानि सन्ति। सः एतेषां लम्बित-विस्तृतपरियोजनाप्रतिवेदन- समूहानां शीघ्रम् अनुमोदनस्य आवश्यकतायाः उपरि बलं दत्त्वा अधिकारिभ्यः सर्वाः आवश्यकाः औपचारिकताः शीघ्रं सम्पन्नं कर्तुं निर्देशं दत्तवान्, येन एतासु परियोजनासु कार्यं शीघ्रमेव आरब्धुं शक्यते। विक्रमादित्यसिंहस्य अध्यक्षतायां शुक्रवासरे लोकनिर्माणविभागस्य तथा राष्ट्रियकृषिग्राम्यविकासबैङ्कस्य अधिकारिभिः सह विभिन्नपरियोजनानां लम्बितविस्तृतपरियोजनाप्रतिवेदनं (डीपीआर) तथा च वृष्टेः कारणात् क्षतिग्रस्तमार्गेषु सेतुषु च पुनर्स्थापनकार्यस्य प्रगतेः विषये समीक्षां कृतवान्। सः अवदत् यत् राज्ये विभिन्नानां आधारभूतसंरचनापरियोजनानां समये कार्यान्वयनार्थं विस्तृतपरियोजनाप्रतिवेदनस्य शीघ्रं अनुमोदनं प्रदातुं आवश्यकम् वर्तते। अनेन नगरीयग्रामीणक्षेत्राणां विकासः त्वरितः भविष्यति इति सः अवदत्। अस्य क्षेत्रस्य जनानां लाभः भविष्यति। अधुनैव प्रचण्डवृष्ट्या क्षतिग्रस्तमार्गाणां पुनर्स्थापनकार्यस्य समीक्षां कुर्वन् लोकनिर्माणमन्त्री क्षतिग्रस्तसेतुनां पुनर्स्थापनं मार्गाणां पुनर्स्थापनं च शीघ्रं कर्तुं अधिकारिभ्यः निर्देशं दत्तवान्।

# HP Education Department: १४ अगस्तपर्यन्तं कार्यभारं न स्वीकृतं चेत् वर्गशः नियुक्तानां टीजीटीशिक्षकाणां कार्यं गमिष्यति




## शिक्षानिदेशालयेन निर्देशाः कृताः

हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः। हिमाचल- प्रारम्भिक- शिक्षानिदेशालयेन वर्गशः चयनितानां टीजीटी-शिक्षकाणां कृते १४ अगस्तपर्यन्तं कार्यभारं न स्वीकर्तृभ्यः कार्यं न दातव्यम् इति निर्णयः कृतः। शिक्षानिदेशालयेन १३ नवनियुक्तानां शिक्षकानां नामसूची प्रकाशिता, आवंटितविद्यालयेषु अगस्तमासस्य १४ दिनाङ्कपर्यन्तं कार्यभारग्रहणस्य निर्देशाः अपि दत्ताः। त्रयाणां शिक्षकाणां कृते अक्तूबर ३१ दिनाङ्कपर्यन्तं समयः दत्तः। जुलाईमासस्य १६, ३० दिनाङ्कयोः निदेशालयेन चयनितटीजीटी- समूहेभ्यः वर्गाधारेण विद्यालयाः आबंटिताः आसन्। १६ शिक्षकाः अद्यापि विद्यालयेषु न सम्मिलिताः। एतेषां शिक्षकाणां कृते अधुना अन्तिमः अवसरः दत्तः। शिक्षानिदेशकः आशीषकोहली इत्यनेन उक्तं यत् इदानीं अधिकं अवसरः न दीयते। यदि एते शिक्षकाः प्रभारं न गृह्णन्ति तर्हि ते कार्यं कर्तुं न इच्छन्ति इति विचार्यते। एतादृशे सति अन्येषां चयनस्य प्रक्रिया वर्गशः सूच्याः आधारेण आरभ्यते।

# HP News: प्राकृतिककृषेः प्रवर्धनं करिष्यति हिम-उन्नति योजना




हिमसंस्कृतवार्ताः - शिमला। कृषिक्षेत्रे नूतनं उपक्रमं कृत्वा राज्यसर्वकारः हिम- उन्नति योजनां कार्यान्वयिष्यति, यस्याः मुख्योद्देश्यं प्राकृतिककृषेः प्रवर्धनम् अस्ति। अस्याः योजनायाः कृते १५० कोटिरूप्यकाणि विनियोजितानि सन्ति। एषा योजना प्रायः १.९२ लक्षकृषकान् प्रोत्साहयिष्यति, ये पूर्वमेव ३२,१४९ हेक्टेयर- अधिकभूमिषु रसायनरहितं कृषिं कुर्वन्ति। योजनायाः मुख्योद्देश्यं कृषिक्षेत्रं आर्थिकरूपेण व्यवहार्यं कर्तुं तथा च समूहाधारितविकासप्रतिरूपद्वारा प्राकृतिककृषेः प्रवर्धनं भविष्यति। योजनायाः अन्तर्गतं सर्वकारः लघुकृषकान् एकीकृत्य स्थापयिष्यति येन ते अधिकमात्रायां उत्पादनं कर्तुं शक्नुवन्ति, तस्मात् पर्याप्तं विपणनयोग्यं अधिशेषं सुनिश्चितं भविष्यति। एतस्याः योजनायाः प्रवर्धनार्थं पशुपालनं, उद्यानपालनं, मत्स्यपालनं, ग्रामीणविकासः इत्यादयः विभागाः समन्वयेन कार्यं करिष्यन्ति। एषा योजना २६०० एकाग्रकृषिसमूहानां निर्माणद्वारा प्रायः ५० सहस्राणां कृषकाणां कृते स्वरोजगारस्य नूतनावकाशान् प्रदास्यति। राज्ये शाकस्य, धान्यस्य च उत्पादकता १५.२० प्रतिशतं वर्धते इति अनुमानितम् अस्ति।

## धान्यं क्रेष्यति राज्यसर्वकारः

मुख्यमन्त्री अवदत् यत् राज्यसर्वकारः प्रतिपरिवारं प्राकृतिककृषिद्वारा उत्पादितस्य २० क्विण्टलधान्यस्य क्रयणं करिष्यति। अस्य अन्तर्गतं गोधूमस्य क्रयणं प्रतिकिलो ४० रुप्यकेण, मक्काधान्यस्य च क्रयणं प्रतिकिलो ३० रुप्यकेण भविष्यति। अस्य उपक्रमस्य उद्देश्यं रसायनरहितं कृषिं प्रोत्साहयितुं, राज्ये कृषि-उद्यमस्य प्रवर्धनं च अस्ति।

# काङ्ग्रेसेन जनसमुदायस्य उपरि भारं स्थापयितुं राज्यव्यापीं अभियानं प्रारब्धम् : सुखरामचौधरी



हिमसंस्कृतवार्ताः - नाहनम्। भाजपानेता पूर्वमन्त्री सुखरामचौधरी वर्तमानकाङ्ग्रेससर्वकारे आक्रमणं कुर्वन् उक्तवान् यत् भाजपासर्वकारेण जनेभ्यः दत्तानां सर्वासां सुविधानां निवृत्त्यर्थं काङ्ग्रेससर्वकारेण राज्यव्यापी अभियानं प्रारब्धम्। सः अवदत् यत् हिमाचलपथपरिवहननिगमस्य बसयानेषु महिलानां, पुलिसकर्मचारिणां, छात्राणां च कृते प्रदत्ताः सर्वाः सुविधाः काङ्ग्रेससर्वकारः निवारयन् अस्ति। जयरामसर्वकारस्य कार्यकाले महिलानां कृते बसभाटके पञ्चाशत् प्रतिशतापकर्षं दत्तम् आसीत् । हिमाचलपथपरिवहननिगमस्य प्रबन्धनस्य अनुसारं प्रतिदिनं षट् लक्षं यात्रिकाः सर्वकारीयबसयानेषु गच्छन्ति। तेषु १.६० लक्षं महिलाः सन्ति, ताभ्यः भाटके पञ्चाशत् प्रतिशतं अपकर्षं प्रदास्यते स्म । तथैव हिमकेयरयोजनायां परिवर्तनं कृत्वा हिमाचलप्रदेशस्य ६० प्रतिशतं जनसंख्याः अस्याः जनकल्याणकारीयोजनायाः बहिर्कृत्वा सर्वकारस्य जनविरोधीमनोवृत्तिं प्रदर्शयति।

# HP Politics: सुविधानां हरणं शून्यविकासश्च सुक्खुसर्वकारस्य उपलब्धिः- जयरामठाकुरः



हिमसंस्कृतवार्ताः - शिमला। विपक्षस्य नेता जयरामठाकुरः उक्तवान् यत् सुक्खुसर्वकारः पूर्णतया जनविरोधी कार्यं कुर्वन् अस्ति। याभिः प्रतिज्ञाभिः काङ्ग्रेसः सत्तां प्राप्तवान्। तस्य विरुद्धं सर्वं कार्यं क्रियते। द्रुतगत्या ऋणग्रहणं, लक्षशः परिवारेभ्यः सुविधानां हरणं, तेषां प्राणान् संकटे स्थापयित्वा, सहस्राणि संस्थानानि पिधाय च सर्वकारस्य सार्धैवर्षस्य कार्यकालस्य उपलब्धिः अस्ति। सुक्खुसर्वकारस्य कार्यकालस्य लेखान्वीक्षणं क्रियते चेत् राज्यस्य दुष्टतमं प्रदर्शनं इति प्रसिद्धं भविष्यति। यदा राज्यं प्रगतेः स्थाने पृष्ठतः गतः। शनिवासरे जयरामः अवदत् यत् एकमपि विकासकार्यं न कृतम्। सुक्खोः सम्पूर्णे कार्यकाले राज्यस्य विकासस्य गतिः शून्या एव अभवत्। हिमाचलस्य सम्पूर्णे इतिहासे गृहीतस्य ऋणस्य अर्धं केवलं सार्धैकवर्षे एव सुक्खुसर्वकारेण गृहीतम्। सुक्खुसर्वकारः सत्तां प्राप्तस्य प्रायः त्रिंशत्सहस्रकोटिरूप्यकाणां ऋणं गृहीतवान्। यदा प्रतिदिनं जनानां कृते प्रदत्ताः महत्त्वपूर्णाः सुविधाः सर्वकारेण हृताः भवन्ति।

# अद्य देशस्य उत्तरीय-प्रभागेषु भीषणातिभीषण वृष्टेः अनुमानभिव्यक्तम्



हिमसंस्कृतवार्ताः। भारतीय-ऋतु-विज्ञान-विभागेन अद्य आदिनं देशस्य उत्तरीय-प्रभागेषु भीषणातिभीषण वृष्टेः अनुमानभिव्यक्तम् विभागेनोक्तं यत् अद्य हिमाचल-प्रदेशे- उत्तराखण्ड-पूर्वी राजस्थानस्य बहुषु क्षेत्रेषु भीषण वर्षा भविष्यति इति संभाव्यते। सप्ताहावधौ मध्यप्रदेशे-विदर्भ- छत्तीसगढ-कोंकण-गोवा-गुजरातस्य क्षेत्रेषु मध्यम-वर्षायाः सम्भावना प्रकाशिता। तमिलनाडु- पुदुचेरी-कराईकल-केरल-माहे-लक्षद्वीप-कर्णाटके च वृष्टेः सूचना सम्प्राप्तास्ति ।

## आंतकीसंघर्षः

# जम्मू-कश्मीरे कठुआ आरक्षिभिः चतुर्णाम्- आतंकवादिनां रेखाचित्रं प्रसारितम्



**हिमसंस्कृतवार्ताः।** जम्मू-कश्मीरे कठुआ आरक्षिभिः चतुर्णामातंकवादिनां रेखाचित्रं प्रसारितम्। आरक्षिभिः प्रत्येकमातंक-वादिनां विषये सूचना-प्रदाने सति पञ्च-लक्ष-रूप्यकाणां पुरस्कारः घोषितः। आतंवादिनां विषयिकां सूचनां यः प्रदास्यति तस्य अभिज्ञानं पूर्णतया गोपनीयं भविता।

# मनुष्यजीवने हरिनाम्नः साहाय्यम् अपेक्षितम्- नारदोपाध्यायः



**हिमसंस्कृतवार्ताः11 अगस्त।** मनुष्यजीवने हि मनुष्यः आत्मनि स्थितं सर्वं मालिन्यं दूरीकर्तुं, मनस्थितिं च पूर्णतः स्वच्छीकर्तुं शक्नुयात् । तदर्थं हरिनाम्नः साहाय्यम् अपेक्षितं भवति । तन्नामरूपाग्निः मनसः समस्तकल्मषं दहति । समस्तसाधनानां प्राणरूपं परमसाधनं हि भगवन्नाम कथ्यते - 'नाम रामको अंक है, सब साधन है सून।'अतः भगवन्नामजपः, संकीर्तनं, भगवत्स्मरणम् इत्यादिकं मनुष्यैः सततं कर्तव्यम् । हरिः ओं तत्सत् !

# पूर्वविदेशमन्त्रिणः नटवरसिंहस्य गुरुग्रामस्य मेदान्टा चिकित्सालये निधनम्




natwar Singh: पूर्वविदेशमन्त्रिणः नटवरसिंहस्य शनिवासरे रात्रौ गुरुग्रामस्य मेदान्टा चिकित्सालये निधनम् अभवत्। सः ९५ वर्षीयः आसीत् । सः चिरकालं यावत् रोगी आसीत् । मेदांता चिकित्सालये तस्योपचारः प्रचलने आसीत्। नटवरसिंहः मई 2004 तः दिसंबर 2005 पर्यन्तं डॉ. मनमोहनसिंहस्य नेतृत्वे सर्वकारे विदेशमंत्रित्वेन कार्यं कृतम्। कांग्रेसस्य वरिष्ठनेता रणदीपसुरजेवाला नटवरसिंहस्य निधने शोकं प्रकटितवान्। शनिवासरे रात्रौ विलम्बेन एकेन पारिवारिकस्रोतेन उक्तं यत् नटवरसिंहस्य पुत्रः चिकित्सालये अस्ति तथा च अन्ये केचन परिवारजनाः रविवासरे दिल्लीनगरे भवितुं शक्नुवन्तः अन्तिमसंस्कारार्थं स्वजन्मराज्यात् दिल्लीनगरम् आगच्छन्ति। सः किञ्चित्कालं यावत् स्वस्थः नासीत् । शनिवासरे रात्रौ विलम्बेन तस्य मृत्युः अभवत् इति सूत्रेण उक्तम्।

# कोटलाबेहड़ विद्यालये अन्तर्गतं १४ तमायाः खण्डस्तरीयाणां क्रीडाप्रतियोगितानां शुभारम्भः







**हिमसंस्कृतवार्ताः, डॉ.अमनदीपशर्मा 11 अगस्त।** कांगड़ाजनपदस्य शिक्षाखण्डः डाडासीबा इत्यस्य अन्तर्गतं पीएमश्रीउत्कृष्टराजकीयवरिष्ठमाध्यमिकविद्यालयः, कोटला बेहड़ विद्यालये खण्डस्तरीयाणां क्रीडाप्रतियोगितानां शुभारम्भः गतशनिवासरे अभवत्। वृष्टिमये वातावरणेऽपि बालक्रीडकानाम् उत्साहः सम्वर्धितः आसीत्। ध्यातव्यमस्ति शिक्षाविभागः हिमाचलप्रदेशः समस्ते हिमाचलप्रदेशे 10 अगस्ततः 14 अगस्तपर्यन्तं विद्यालयीयक्रीडाप्रतियोगितानाम् आयोजनं कुर्वन्नस्ति यस्मिन् १४ आयुवर्गस्य छात्राः क्रीडिष्यन्ति। छात्रेषु क्रीडाभावनायाः विकासार्थं किञ्च क्रीडाप्रतिभानां चयनार्थम् एतादृशीनां प्रतियोगितानाम् आयोजनं प्रतिवर्षं क्रियते। अस्मिन् अवसरे क्रीडाप्रतियोगितानां संयोजकेन प्रधानाचार्येण नरेशधीमानेन सर्वेभ्यः विद्यार्थीभ्यः शुभकामनाः प्रदत्ता। तेनोक्तं यत् क्रीडाभावना अस्मासु अनुशासनपूर्वकम् आचरणस्य शिक्षां प्रददाति। कार्यक्रमेऽस्मिन् मुख्यातिथित्वेन कांग्रेसदलस्य खण्डाध्यक्षः पूर्वकर्मचारीकल्याणबोर्ड इत्यस्य अध्यक्षः सुरेन्द्रमनकोटिया आसीत्। मनकोटिया वर्येण ध्वजारोहणेन कार्यक्रमस्य शुभारम्भः विहितः। तेनोक्तं यत् छात्रैः आनन्दपूर्वकं क्रीडाप्रतियोगितासु भागग्रहणं करणीयम्। क्रीडाभावनया परस्परं स्नेहभावनायाः भावः जागृतः भवति। विद्यालयस्य शिक्षिकया हिन्दीविभागस्य प्रवक्त्र्या आशाकुमार्याः कार्यक्रमे मंचसञ्चालनं कुर्वन् सर्वे श्रौतारः स्वगीतैः कण्ठमाधुर्येण च मोहिताः। कार्यक्रमेऽस्मिन् विविधेभ्यः विद्यालयेभ्यः छात्राः शिक्षकाश्चोपस्थिताः आसन्। कार्यक्रमे विविधानां सांस्कृतिकगतिविधिनानाम् आयोजनं कोटलाबेहड़ विद्यालयस्य छात्रैः कृतम्। कार्यक्रमस्य सफलसंयोजनाय विद्यालयस्य भूमिका सर्वैः प्रशंसिता।

# महन्त श्रीकमलजीतसिंहशास्त्रिणा सह जातं शिष्टाचारसङ्गमम्



**हिमसंस्कृतवार्ताः - जगदीश डाभी 11 अगस्त।** गतशुक्रवासरे पंजाबस्य निर्मल- सम्प्रदायस्य विद्वन्महन्तेन कमलजीतशास्त्रिणा सह संस्कृतभारत्याः अधिकारीगणानां शिष्टाचारमेलनमभवत्। मेलनेऽस्मिन् कमलजीतशास्त्रिणा उक्तं यत् संस्कृतं सर्वेषां भारतीयानां कृते अनिवार्यमस्ति। अनेन विना जनाः भारतस्य संस्कृतिं, एतस्याः ग्रन्थाञ्च सम्यक्प्रकारेण न अवगन्तुं शक्नुवन्ति। सिक्खसम्प्रदाये अपि संस्कृतं विना गुरुवाण्याः सम्यक् अर्थावगमनं न भवति, अतः सिख्खसाहित्यस्य विशेषज्ञानाय संस्कृतस्य ज्ञानम् अवश्यकमस्ति। शास्त्रिमहोदयः काश्यस्थ-निर्मलसम्प्रदायस्य मठे निवस्य दशवर्षाय संस्कृतभाषामधीतवान्, यत्र सः व्याकरणादिसहितं वेदवेदान्तसाहित्यविषयाणां सम्यग्ज्ञानं प्राप्तवान्। सम्प्रति पंजाबे निवस्य मोगासमीपे निजमठे एव एषः वेदान्त-सांख्यादिग्रन्थान् पाठयन्नस्ति, पुनः तत्रैव संस्कृत-महाविद्यालय- स्थापनस्य अस्य इच्छा वर्तते येन माध्यमेन पञ्जाबजनाः संस्कृतभाषामवगम्य गुरुवाणीं सम्यग्तया अवगन्तुं शक्नुयुः। अस्मिन् शिष्टाचारसङ्गमे संस्कृतभारती-पंजाबस्य अध्यक्षः डॉ. वीरेन्द्रकुमारः, पंजाबप्रान्तस्य सहमन्त्री अजयकुमार आर्यः, पटियाला- विभाग-सहसंयोजकः डॉ. ओमनदीपशर्मादयः उपस्थितः आसन्।

# संस्कृतदिवस-पालनम्




अतीव हर्षस्य विषयो यत् सम्प्रति आभारतं हि संस्कृतस्य सुन्दरं जागरणं दृश्यते । न केवलं भारते हि, अपितु अखिलविश्ववासिनो हि देवभाषाम् इच्छन्ति, यथाशक्यं पठन्ति, भाषन्ते च । देवभाषायाः दिव्यप्रभावः सर्वत्र प्रसारितः, व्याप्तश्च अस्ति अधुना । अन्यक्षेत्रेषु इव अस्माकं विश्वनाथजिलाक्षेत्रे अपि देवभाषायाः प्रसारणम्, जनाकर्षणं च सम्यगेव । संस्कृतभारती, विश्वनाथजिलाशाखा इति नामधेयं संस्कृतसङ्घटनम् अत्र पञ्चषेभ्यः वर्षेभ्यः पूर्वं समुद्घाटितम् अभूत् । सम्प्रति अस्याः समितेः अध्यक्षो मान्यवरः श्रीलोकनाथोपाध्यायः, सेवानिवृत्तः संस्कृतप्राध्यापको वर्तते । एवञ्च समितेः सचिवः सतियामहाविद्यालयस्य संस्कृताध्यापकः श्रीमान् डा०दीपेनभरालीमहाभागो विराजते । द्वाभ्यामपि समितिरियम् अतीव निष्ठापूर्वकं जनहितकामनया च परिचाल्यते । संस्कृतसप्ताहावसरे समितिपक्षतः प्रतिवर्षं भव्यानुष्ठानम् आयोज्यमानम् अस्ति । गतवर्षे विहालि-महाविद्यालये अनुष्ठानमिदम् अनुष्ठितमभूत्। अस्मिन् वर्षेऽपि श्रावणिपूर्णिमावसरे दिनस्थानादिकं निर्धार्य संस्कृतदिवसोऽयम् आयोक्ष्यते । अस्मिन् वर्षे संस्कृतानुरागिणाम् उपस्थितिः आशानुरूपा भविष्यतीति विश्वासः । शुभमस्तु । -- नारदः ।